# संस्कृतवार्ता:

दिनाङ्क :- 24/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- राज्यसभा पूर्णदिवसाय स्थगिता।
- राष्ट्रपतिपदासीनया द्रौपदीमुर्मु वर्यया प्रोक्तं यत् वामपन्थावलम्बिना उग्रवादेन प्रभावितान् जनान् मुख्यधारया योजनकार्यम् अन्तिमचरणे सम्प्राप्तमस्ति।
- दक्षिण-कोरिया-देशस्य संवैधानिक-न्यायालयेन महाभियोगलिप्तं प्रधानमन्त्रिणं हान डक-सू इत्यमुं कार्यवाहक-राष्ट्रपतित्वेन पुनर्नियुक्तिः प्रदत्ता।
- भारतीय-ऋतुविज्ञान-विभागेन प्रायद्वीपीय-उत्तरभारते कतिपयस्थलेषु सघोषं सामान्यतः मध्यमस्तरीयायाः वर्षायाः अनुमानम् अनुमितमस्ति।
- आईपीएल इति क्रिकेटस्पर्धामालिकायां अद्य संध्यायां विशाखापत्तनमनगरे दिल्ली कैपिटल्स इति दलस्य साम्मुख्यं लखनऊ सुपर जायंट्स इति दलेन सह भविष्यति।

---------------------------------------

राज्यसभा-गतिरोध:

कर्नाटकराज्यस्य उपमुख्यमन्त्रिणः डीके शिवकुमारस्य विशेषाल्पसंख्यकसमूहाय आरक्षणप्रदानोक्त्या सदने कोलाहलं समुत्पन्नम्। अस्मात् कारणात् संसदः उभयोः सदनयोः कार्यजातं मध्याह्न-द्विवादनं यावत् स्थगितमभवत् । राज्यसभायां सदननेत्रा जे.पी. नड्डा इत्यमुनापि कांग्रेसदलम् अनया रीत्या संविधानं दुर्बलीकरोतीत्याक्षिप्तम् । तेनोदीरितं यत् कर्नाटकराज्यस्य कांग्रेससर्वकारेण पूर्वमेव सार्वजनिकस्थलेषु धर्माधारेण चतुःप्रतिशतं आरक्षणं पारितमस्ति। अस्य प्रत्युत्तररूपेण विपक्षनेत्रा मल्लिकार्जुनखडगे इत्यनेन कथितं यत् डॉ. अम्बेडकरेण विनिर्मितम् संविधानं न कोऽपि परिवर्तितुं शक्नोति सहैव देशस्य आरक्षणव्यवस्थां

कोऽपि समापयितुं नार्हति । तेन भाजपादलं संविधानस्य शिथिलीकरणाय प्रत्याक्षिप्तम्। कोलाहलाधिक्यम् दृष्ट्वा सभापतिः जगदीप-धनखडः सदनस्य कार्याचरणम् स्थगितवान्। लोकसभायां यदा द्वादशवादने स्थगितं कार्याचरणं पुनः समारब्धं तदा श्रीमान् रिजिजू इत्येषः अवदत् यत् धर्माधारेण आरक्षणस्य विषयः सप्तचत्त्वारिंशदधिक-एकोनविंशतितमे वर्षे समायातः ततः सर्वे प्रमुखनेतारः तस्य निराकरणं कृतवन्तः । तेन एतदपि प्रोक्तं यत् कांग्रेसदलेन स्वनेतारः असंवैधानिक-कथनार्थं पदात् निष्कासनीयाः।

----------------------------------------

राष्ट्रपतिः-छत्तीसगढ

राष्ट्रपति-पदासीना द्रौपदी मुर्मुः अद्य रायपुरनगरे छत्तीसगढविधानसभायाः रजतजयन्त्युत्सवे भागमभजत्। समारोहे सा अवदत् यत् वामपन्थ्युग्रवादेन प्रभावितजनानां समाजस्य मुख्यधारायां संयोजनकार्यं स्वीयान्तिमे निर्णायके च चरणे संप्राप्तम्।

राष्ट्रपतिना महिला-विधायकेभ्यः विविधक्षेत्रेषु कार्यरतानां महिलानां प्रोत्साहनार्थं निवेदनं कृतम् । सा एतदपि अवदत् यत् महिलाः यदा परस्परं सशक्तिकरणं करिष्यन्ति तदा अस्माकं समाजः इतोऽपि दृढः संवेदनशीलश्च भविष्यति।

बाइट-द्रौपदी मुर्मु ऑन वुमन-20 से.

पश्चात् राष्ट्रपतिः ओडिशाराज्यस्य द्विदिवसीययात्रायै भुवनेश्वरम् अगच्छत्।

----------------------------------------

लोकसभा-वित्तविधेयकः

लोकसभायाम् पञ्चविंशत्युत्तर-द्विसहस्रतम- वित्तविधेयकस्य विषये चर्चा संवृत्ता। चर्चायां भागं भजन् भाजपायाः निशिकान्त-दुबे इत्येषः अवदत् यत् सम्पूर्णं विश्वम् आर्थिकसङ्कटं सम्मुखीकरोति , तत्रैव भारतं विगतदशवर्षेषु अत्युज्ज्वलतया समेधमानमस्ति।

श्रीदुबे इत्येषः अवदत् यत् ऑनलाइन-क्रीडायाः अनियन्त्रित-विकासं निरोद्धुं तस्यामुपरि अष्टाविंशति-प्रतिशतमितं वस्तुसेवाकरः आरोपितः ।

सः प्रोक्तवान् यत् ऑनलाइन-क्रीडया युवानः क्षतिं प्राप्नुवन्ति, सहैव ते स्वजनकयोः श्रमसंपादितां सम्पत्तिमपि द्यूतक्रीडायाम् अपव्ययन्ति। चर्चायामस्यां भागग्रहणं कुर्वन् समाजवादी-पार्टीतिदलस्य नीरजमौर्यः प्रोक्तवान् यत् सर्वकारेण आयव्ययके अनुसूचितजातयः, अल्पसंख्यकाश्च विशेषरूपेण अवधातव्याः । तेनोक्तं यत् एतेषां विकासेन विना विकसित-भारतस्य स्वप्नः नैव सफलीभविष्यति।

---------------------------------------

महाराष्ट्र-कामरा/प्राथमिकी

मुम्बई आरक्षिबलेन भाणत्वेन हास्यविनोद-कर्तारं कुनाल-कामरा इत्यमुं विरुध्य प्राथमिकी पञ्जीकृतास्ति। तस्मिन् आक्षेप: अस्ति यत् तेन एकस्मिन् हास्यकार्यक्रमे महाराष्ट्रस्य उपमुख्यमन्त्रिण: एकनाथ-शिन्दे इत्यस्योपरि आपत्तिकरा टिप्पणी कृतास्तीति। अधिकारिभि: प्रोक्तं यत् आरक्षिणा चत्वारिंशदधिकान् शिवसेना-कार्यकर्तॄन् विरुध्य अपि प्राथमिकी पञ्जीकृतास्तीति।

---------------------------------------

शिवराजसिंह-पलाण्डु/नियति:

केन्द्रीय-कृषि-मन्त्रिणा शिवराजसिंह-चौहान इत्यमुना प्रोक्तं यत् केन्द्रप्रशासनेन पलाण्डु: इत्यस्योपरि विंशतिप्रतिशतात्मकं निर्यातकरं पूर्णत: समाप्तमिति। अद्य नवदिल्ल्यां वार्ताहरै: सह भाषमाणेन मन्त्रिणा एतत् घोषयता प्रोक्तं यत् अनेन कृषकाणां कठोरश्रमार्जितं फलं शुल्कं विनैव वैश्विक-आपणं सम्प्राप्तुं शक्नोति सहैव हि स्वस्य श्रमस्य अधिकम् उपयुक्तञ्च मूल्यमपि प्राप्तुं शक्नुवन्तीति।

---------------------------------------

राज्यसभोपवेशनम्

दिल्ल्युच्चन्यायालयस्य न्यायाधीशगृहात् अग्निप्रसङ्गोत्तरं निगृहीतधनराशेः प्रकरणमालक्ष्य अद्य राज्यसभायाः सभापतिः जगदीप-धनखडः जेपी-नड्डा - मल्लिकार्जुन-खड्गे इत्येताभ्यां सहोपवेशनम् अकरोत्। अत्रान्तरे दिल्ल्युच्चन्यायालयेन तत्क्षणप्रभावेण न्यायमूर्तेः यशवन्तवर्मणः न्यायिककार्यं प्रत्याहृतम्। उच्चन्यायालयेन अद्य पत्रक-सूचनामाध्यमेन एतदुद्घोषितम् । न्यायमूर्तिः वर्म्मा आरोपान् निराकुर्वन् उक्तवान् यत्तेन अथ तस्य पारिवारिक- सदस्येन च स्वगृहस्य सङ्ग्रहकक्षे धनराशिः नैव स्थापितः।

----------------------------------------

<u>वनवृक्षक्षेत्रम्</u>

सर्वकारेण अद्य विज्ञापितं यत् देशस्य वनवृक्षक्षेत्रम् आहत्य सप्तविंशतिसहस्त्राधिक-अष्टलक्षवर्गकिलोमीटर-मितात्मकादप्यधिकं विद्यते, यद्देशस्थ भौगोलिकक्षेत्रस्य पञ्चविंशति-प्रतिशतमितात्मकात् अधिकमस्ति। पर्यावरण-वन-जलवायुपरिवर्तनमन्त्री भूपेन्द्रयादवः अद्य लोकसभायाम् एकस्य प्रश्नस्य उत्तररूपेण उक्तवान् यत् गताकलनानुसारेण इयं वृद्धिः पञ्चचत्त्वारिंशदधिक-चतुश्शतोत्तर-एकसहस्त्रकिलोमीटर-मितात्मकादप्यधिका समजायत।

----------------------------------------

<u>दक्षिण कोरिया</u>

दक्षिणकोरियाया: संवैधानिक-न्यायालयेन प्रधानमन्त्रिणं हान-डक-सू इत्यमुं प्रति प्रचाल्यमानम् महाभियोगं प्रत्यावर्त्य तस्मै पुन: कार्यवाहक-राष्ट्रपतित्वेन नियुक्ति: प्रदत्ता।

----------------------------------------

<u>शेयर-बाजार</u>

शेयर बाजाराख्य: प्रतिभाग-आपण: सेंसेक्स-निफ्टी च इत्येतौ सहस्राधिकानाम् अङ्कानां वृद्धिपूर्वकं प्रायश: अष्टसप्ततिसहस्राणाम् उन्नतिम् अस्पृशताम्। एन.एस.ई. इति राष्ट्रियापणश्च त्रिशताधिक- अङ्कानां वृद्धिं सम्प्राप्य सार्धत्रयोविंशतिसहस्राणाम् उन्नतौ अस्ति।

-----------------------------------------

ऋतुविज्ञानविभाग:

भारतीय-ऋतु-विज्ञान-विभागेन पूर्वानुमानं विहितमस्ति यत् अद्य आन्ध्रप्रदेशस्य तटवर्तिषु क्षेत्रेषु, यनम-तेलंगाना-दक्षिणान्तरिक-कर्णाटके च सामान्यत: मध्यमप्रकारिका वर्षा भविष्यतीति। विभागानुसारम् अग्रिम त्रिचतुर्दिवस-कालावधौ जम्मू-कश्मीर-लद्दाख-हिमाचल-प्रदेशेषु च दामिनीभि: समलङ्कृता सघोषा वर्षा भवितुं शक्नोतीति।

-----------------------------------------

क्रिकेट-क्रीडा

इण्डियन-प्रीमियर-लीग इत्याख्यायां क्रिकेटक्रीडास्पर्धा-मालिकायां देल्ही-कैपिटल्स इति दलस्य साम्मुख्यं संध्यायामद्य लखनऊ-सुपर-जाईंट्स इति दलेन सह भविष्यति। संघर्षोऽयं विशाखापत्तनम् इत्यत्र सार्धसप्त-वादनत: समारप्स्यते। ह्य: चेन्नई-सुपर किंग्स इति दलेन मुम्बई-इण्डियंस इति दलं चतुर्णां क्रीडकाणाम् अवशेषे विजितम्। अपरत्र हैदराबादस्थे राजीवगान्धी-अन्ताराष्ट्रिय-क्रीडाङ्गणे सनराइजर्स हैदराबादेति दलेन राजस्थान रायल्स इति दलं चतुश्चत्वारिंशत् क्रीडा-धावनाङ्कै: पराजितम्।

।। इति वार्ता:।।